# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| | | |
|---|---|---|
| **कक्षा – शास्त्रिद्वितीयवर्षम्** (SEM-3) | **प्रश्नपत्रम् – ४** | **गुणाः – ७०** |
| **विषयः – संस्कृतसम्भाषणम्** | (O.E.-2.3.3.) | |
| **दिनाङ्कः – ०७/१२/२०१८** | (ग्रन्थः –द्वितीयदिक्षा व्यवहारप्रदीपः,प्रथमभागः) | **समयः –०२.०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ अधोदत्तेषु वाक्येषु केषाञ्चन दशानां रेखाङ्कितशब्दानां प्रातिपदिकं निर्दिशत ।** **( १० )**

**उदाहरण :–** एषः बालकः पठति ⇨ प्रातिपदिकम् – 'बालक'

(१) श्वशुरः जामातारं सत्करोति ।

(२) अहं जगद्गुरून् वन्दे ।

(३) साधवः आचारशीलाः भवन्ति ।

(४) मम स्वसारः नृत्यन्ति ।

(५) एते रज्जू स्तः ।

(६) तस्य अस्थीनि दृढानि सन्ति ।

(७) धनवन्तः गौरवं लभन्ते ।

(८) मन्त्रिणौ समालोचनां कुरुतः ।

(९) योषितः दूरदर्शनं पश्यन्ति ।

(१०) यज्ञकुण्डे समिधः ज्वलन्ति ।

(११) एषा अप्सराः नृत्यति ।

(१२) एतानि धनिकस्य वेश्मानि सन्ति ।

**प्रश्नः २ अधोदत्तान् शब्दान् प्रयुज्य द्विवचने वाक्यानि रचयत ।( कानिचन दश )** **( १० )**

**उदाहरण :– ऋषिः** ⇨ ऋषी गच्छतः ।

| | | |
|---|---|---|
| (१) कविः | (२) बहुः | (३) पिता |
| (४) देवी | (५) वधूः | (६) ननान्दा |
| (७) सम्राट् | (८) बुद्धिमान् | (९) विद्यार्थी |
| (१०) परिषत् | (११) अप्सराः | (१२) दाम |

## द्वितीयान्विति:

**प्रश्न: ३ कोष्ठके दत्तानां प्रातिपदिकानां द्वितीयान्तै: रूपै: रिक्तस्थानानि पूरयत ।** **( १० )**

**उदाहरण :-** आचार्य: विद्यार्थिनं पाठयति । (विद्यार्थिन् )

(१) महाराज: ____________________ नमति । (ऋषि)

(२) वित्तमन्त्री ____________________ उद्बोधयति । (विक्रेन्तृ)

(३) छात्र: ____________________ दर्शयति । (लेखनी )

(४) कपि: ____________________ कण्डूयते ।। (जानु)

(५) अर्जुन: मत्स्यस्य ____________________ पश्यति । (अक्षि)

(६) सभासद: ____________________ पश्यन्ति । (राजन् )

(७) अहं ____________________ नमामि । (महत्)

(८) छात्र: ____________________ वदति । (नामन्)

(९) राम: हस्ते ____________________ धारयति । (धनुष्)

(१०) ____________________ उभयत: वृक्षा: सन्ति । (नदी)

(११) ____________________ परित: कीटा: सन्ति । (दीप)

(१२) ____________________ सर्वत: गोप्य: सन्ति । (कृष्ण)

**प्रश्न: ४ उदाहरणानुसारं दश रिक्तस्थानानि पूरयत ।** **( १० )**

**उदाहरण :-** छात्र: विद्यालयं गच्छति । (विद्यालय-एक० )

(१) कार्यदर्शी ____________________ प्रोत्साह्यति । (कार्यकर्तृ – बहु०)

(२) माता ____________________ शिशुं दर्शयति । (पक्षिन् – द्वि० )

(३) शिक्षक: ____________________ उत्तरं वदति । (अध्येतृ - एक० )

(४) पार्थ: ____________________ विना विद्यालयं न गच्छति । (स्वसृ - एक०)

(५) नेतार: ____________________ उद्बोधयन्ति । (जन –बहु०)

(६) ____________________ परित: पिपीलिका: सन्ति । (शर्करा - बहु० )

(७) सा ____________________ गतवती । (नवदेहली - एक० )

(८) बालक: गीतापुस्तकं क्रतुं_____ प्रेरयति । (भ्रातृ –बहु०)

(९) योद्धा असुराणां _______ छिनत्ति । (शिरस् -एक०)

(१०) बालक: ___________ पश्यति । (श्मश्रु – द्वि ०)

(११) ____________________ धिक् । (भ्रष्टाचारिन् – बहु०)

(१२) संस्कृतस्य _______ धिक् । (निन्दक: बहु० )

## तृतीयान्विति:

**प्रश्न: ५ अधोदत्तान् सर्वनामशब्दान् उपयुज्य दश वाक्यानि रचयत ।** **( १० )**

| | | | |
|---|---|---|---|
| (१) | अस्य | (७) | एतान् |
| (२) | तस्याम् | (८) | ता: |
| (३) | तम् | (९) | त्वाम् |
| (४) | सर्वा: | (१०) | तेभ्य: |
| (५) | कौ | (११) | अस्माकम् |
| (६) | आवयो: | (१२) | भवत: |

**प्रश्न: ६ अधोनिर्दिष्टान् अव्ययाानि उपयुज्य दशवाक्यानि लिखत ।** **( १० )**

उहारणम् :- पुरा ⇨ पुरा श्रीरामनामा राजा अभवत् ।

| | | | |
|---|---|---|---|
| (१) | मा | (७) | चिरम् |
| (२) | स्म | (८) | समया |
| (३) | अपि | (९) | ऋते |
| (४) | ह्य: | (१०) | शनै: |
| (५) | परश्व: | (११) | अलम् |
| (६) | प्रदाय | (१२) | क्वचित् |

## चतुर्थान्विति:

**प्रश्न: ७ कानिचन दश वाक्यानि संशोधयत ।** **( १० )**

**उदाहरणम् :-** अहं त्वं पश्यामि । ⇨ अहं <u>त्वां</u> पश्यामि ।

| | | | |
|---|---|---|---|
| (१) | सर्वान् सभासदान् प्रणमामि । | (७) | एषा अप्सरा: नृत्यन्ति । |
| (२) | परश्व: शुक्रवासर: आसीत् । | (८) | भारतस्य समया श्रीलङ्कादेश: वर्तते । |
| (३) | छात्र: लेखनी क्रीणाति । | (९) | चौरस्य धिक् । |
| (४) | नद्या: उभयत: तटा: सन्ति । | (१०) | पक्षिणा: वृक्षे तिष्ठति । |
| (५) | एता: बालिके स्त: । | (११) | भ्रातारौ श्लोकं पठत: । |
| (६) | धनवान् गौरवं लभन्ते । | (१२) | अहं गणेशाय: नमस्करोमि । |

--००--